# HALF YEARLY EXAMINATION, 2024-25

**SANSKRIT**

**Time – 3:00 Hrs.** **Class – IX** **M.M. : 80**

**Date – 12.09.2024 (Thursday)**

**Name of the student ________________________________________________ Section _____**

**निर्देशाः**

1. प्रश्नपत्रे चत्वारः खण्डाः सन्ति।

| | | |
|---|---|---|
| खण्डः (क) | अपठित अवबोधनम् | – 10 अङ्काः |
| खण्डः (ख) | रचनात्मकं कार्यम् | – 15 अङ्काः |
| खण्डः (ग) | अनुप्रयुक्तव्याकरणम् | – 25 अङ्काः |
| खण्डः (घ) | पठित अवबोधनम् | – 30 अङ्काः |

2. सर्वे प्रश्नाः अनिवार्याः।
3. प्रश्नानाम् उत्तराणि खण्डानुसारं क्रमेणैव लेखनीयानि।
4. प्रश्नसंख्या अवश्यलेखनीया।
3. उत्तराणि संस्कृतेन एव लेखनीयानि।

## खण्डः 'क' अपठित – अवबोधनम्

**प्र.1 अधोलिखितम् अनुच्छेदं पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि लिखत।** **(10)**

द्रुमाः वसुन्धरायाः अलङ्काराः सन्ति, ये आजीवनम् दूषितवायोः विषं पिबन्ति, प्राणिभ्यः अमृततुल्यं शुद्धवायुम् च उत्सृजन्ति। एते उपकारिणः स्वयम् आतपे तिष्ठन्ति, ग्रीष्मतापेन तप्तेभ्यः श्रान्तेभ्यः च जनेभ्यः शीतलां छायां यच्छन्ति। भारतीयसंस्कृतौ वटवृक्षस्य, अश्वत्थतरोः तुलसीपादपादीनां च बहुमानः क्रियते। वटवृक्षस्य अधः उपविश्य गुरवः शिष्यान् उपदिशन्ति स्म। विविधैः फलैः प्रसूनैः च अलङ्कृताः महीरुहाणाम् विनताः शाखाः मानवेभ्यः विनम्रतायाः आचरणस्य सन्देशं यच्छन्ति। वृक्षाणाम् सङ्गे मनुष्याः अतीव शान्तिं विन्दन्ति। मनुष्याणाम् स्नेहस्पर्शेन च पादपाः सम्यक्रूपेण विकसन्ति। अतः अस्माभिः समयं प्राप्य वृक्षैः सह प्रकृतिमातुः अङ्के अवश्यमेव स्थातव्यम् । असंख्यजीवजन्तूनाम् आश्रयस्थलानि अनेकेषाम् खगानां नीडानि एते पुष्पिताः फलिनः च वृक्षाः स्थाने स्थाने रोपणीयाः रक्षणीयाः वर्धनीयाः च।

**I. एकपदेन उत्तरत । (केवलं प्रश्नद्वयम्)** **1x2=2**

(i) वसुन्धरायाः अलङ्काराः के सन्ति?

(ii) द्रुमाः प्राणिभ्यः कीदृशं वायुम् उत्सृजन्ति?

(iii) वृक्षाणाम् सङ्गे मनुष्याः किं विन्दन्ति ?

**II. पूर्णवाक्येन उत्तरत । (केवलं प्रश्नद्वयम्)** **2x2=4**

(i) महीरूहाणां विनताः शाखाः मानवेभ्यः कस्य सन्देशम् यच्छन्ति?

(ii) पादपाः कथं सम्यक्रूपेण विकसन्ति ?

(iii) गुरवः कुत्र शिष्यान् उपदिशन्ति स्म ?

**III. अस्य अनुच्छेदस्य कृते समुचितं शीर्षकम् लिखत ।** **1**

**IV. यथानिर्देशमुत्तरत। (केवलं प्रश्नत्रयम्)** **1x3=3**

(i) अनुच्छेदे 'विकसन्ति' इति क्रियापदस्य कर्तृपदम् किम् ?

(क) मनुष्याणाम् (ख) पादपाः (ग) स्नेहस्पर्शेन (घ) सम्यक्

(ii) 'एते उपकारिणः' अत्र 'एते' सर्वनामपदम् केभ्यः प्रयुक्तम्?

(क) वृक्षेभ्यः (ख) जनेभ्यः (ग) श्रान्तेभ्यः (घ) तप्तेभ्यः

(iii) 'पुष्पैः' इति अर्थे किम् पदम् अत्र प्रयुक्तम्?

(क) फलैः (ख) प्रसूनैः (ग) वृक्षैः (घ) विविधैः

(iv) 'एते पुष्पिताः फलिनः च वृक्षाः स्थाने स्थाने रोपणीयाः रक्षणीयाः वर्धनीयाः च।' अत्र विशेष्यपदम् किम्?

(क) एते (ख) पुष्पिताः (ग) फलिनः (घ) वृक्षाः

## खण्डः 'ख' - रचनात्मकं कार्यम्

**प्र.2 भवान् गौरवः अस्ति। भवतः मित्रम् मयकः नवमीकक्षायाम् प्रविष्टः । स्वमित्रम् नवमीकक्षायां संस्कृतम् पठितुम् प्रेरयितुम् लिखिते अस्मिन् पत्रे रिक्तस्थानानि पूरयित्वा उत्तरपुस्तिकायां लिखत ।** 5

प्रिय मयंक,

(i) ............................ ।

अत्र (ii) ......................तत्रास्तु। तव पत्रात् ज्ञातं यत् त्वम् नवमकक्षायां संस्कृतम् पठितुम् इच्छसि। एतत् ज्ञात्वा अहम् अतिप्रसन्नः (iii) .........................यतः संस्कृतम् पठित्वा वयं स्वदेशस्य गौरवम् अनुभवितुम् (iv) ............................... । इयं देवभाषाविश्वस्य सर्वासु भाषासु प्राचीनतमा (v) ...................च अस्ति। विश्वस्य (vi)........................भाषासु भारतीयभाषासु च (vii).......................शब्दाः प्राप्यन्ते | किम् त्वम् जानासि यत् वेदाः, रामायणम्, महाभारतम्, उपनिषदः, पञ्चतन्त्रहितोपदेशादयः (viii).......................संस्कृते एव लिखिताः सन्ति ।

अतः त्वम् सर्वैः (ix) ............................सह संस्कृतमपि परिश्रमेण पठ। अवकाशेषु मम गृहम् आगच्छ। मातापितृभ्याम् मम प्रणामान् कथय ।

तव (x) .........................

गौरवः।

| | |
|---|---|
| **मञ्जूषा –** | अभवम् , नमोनमः, मित्रम् , शक्नुमः, विषयैः, संस्कृतस्य, अनेकासु, ग्रन्थाः, वैज्ञानिकी, कुशलं |

**प्र.3 अधोप्रदत्तं चित्रम् दृष्ट्वा मञ्जूषायाः पदानां सहायतया चित्रस्य वर्णं पञ्चवाक्येषु कुरुत –** 1x5=5



| | |
|---|---|
| **मञ्जूषा –** | गृहस्य, चायपानम्, पितामहः, समाचारपत्रम्, जनकः, तिष्ठति, एतत् चित्रम्, सन्ति, अस्ति, अत्र, एकः बालः, पितामही, कार्यालयं गच्छति, एकं चित्रम्, प्रसन्नः |

**प्र.4 अधोलिखितं संवादं मञ्जूषायां प्रदत्तपदानां सहायतया पूरयत–** 1x5=5

**रमा** - त्वं (i) ............................विद्यालयम् किमर्थम् न आगच्छः।

**स्नेहा** - ह्यः मम (ii)..............................रुग्णा आसीत् ।

**रमा** - तव माता केन रोगेण (iii).......................................आसीत् ?

**स्नेहा** - सा (iv)...........................................पीडिता आसीत्।

**रमा** - अधुना सा (v)...................................अस्ति न वा ?

**स्नेहा** – अधुना तु सा स्वस्था अस्ति।

| | |
|---|---|
| **मञ्जूषा –** | ज्वरेण, ह्यः, पीडिता, स्वस्था, माता |

**अथवा**

**अधोलिखितकथायाः पूर्तिम् मञ्जूषायां दत्तानां पदानां सहायतया कुरुत–**

एकदा अहम् सपरिवारं हिमाचलप्रदेशस्य यात्रायाम् अगच्छम् । तत्र मम प्रथमं विश्रामस्थलं शिमला नगरमासीत् । तस्य (i)........................शोभा अवर्णनीया आसीत् । अनुभूतं यत् प्रकृति-देवी स्व सर्वां सुन्दरतां अत्रैव विस्तारितवती। स्थलेषु (ii).......................हाटकं दृष्ट्वा वयं सर्वे मन्त्रमुग्धाः अभवाम।तत्पश्चात् वयं चिन्तपूर्णी (iii)............................गतवन्तः । तत्र मातुः (iv) .................दर्शनार्थमनेके जनाः आगताः आसन्। श्रूयते यत् तत्र गत्वा जनाः यत् इच्छन्ति तेषां (v).........................अवश्यमेव पूर्णा भवति। अतः अहमपि तत्र विद्यासुखस्वास्थ्यान् प्राप्तुं प्रार्थनाम् अकरवम्। ततः कसौली ज्वालाजी इत्यादीनि स्थानानि गत्वा स्वगृहं प्रत्यागच्छम् ।

| मञ्जूषा – | आकर्षकम्, तीर्थम्, चिंतापूर्ण्याः, नगरस्य, मनोकामना |
|---|---|

## <u>खण्डः</u> 'ग' (अनुप्रयुक्त–व्याकरणम्)

**प्र.5 रेखाङ्कितपदानां सन्धिं विच्छेदं वा कृत्वा लिखत – (केवलं प्रश्नपञ्चकम्)** **1x5=5**

(i) **<u>संकटापन्ने</u>** काले विचारमग्नः अस्ति ।

(ii) भवन्ति नम्रास्तरवः **<u>फलोद्गमैः</u>**।

(iii) **<u>अस्ति + उज्जयिन्यां</u>** माधवः नाम विप्रः।

(iv) अत्र **<u>दैवम् + कारणम्</u>** इति न उचितम्।

(v) **<u>काष्ठात् + अग्निः</u>** जायते मथ्यमानात् ।

(vi) **<u>अश्म + अपि</u>** याति देवत्वं महद्भिः सुप्रतिष्ठम् ।

**प्र.6 उचितविभक्तिपदं विकल्पेभ्यः चित्वा वाक्यानि पूरयत – (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) रामः....................................अलम् । (रावण)

(क) रावणम् (ख) रावणाय (ग) रावणेन (घ) रावणस्य

(ii) छात्रैः.............................................न भेतव्यम्। (पठन)

(क) पठनात् (ख) पठने (ग) पठनेन (घ) पठनस्य

(iii) शीला..................................प्रति कदा गमिष्यति? (गृह)

(क) गृहम् (ख) गृहस्य (ग) गृहात् (घ) गृहेण

(iv) शिक्षकः...............................................विश्वसिति। (छात्र)

(क) छात्रान् (ख) छात्राः (ग) छात्रेषु (घ) छात्रैः

(v) अस्माकं.............................. पुरतः एकम् उद्यानम् अस्ति ।

(क) गृहम् (ख) गृहस्य (ग) गृहः (घ) गृहे

**प्र.7 प्रदत्तविकल्पेभ्यः उचितं शब्दरूपं चित्वा वाक्यानि पूरयत – (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) आज्ञा ....................................हि अविचारणीया। (गुरु)

(क) गुरुः (ख) गुरुवे (ग) गुरुणाम् (घ) गुरुषु

(ii) .......................................... शोभते नरः। (विद्या)

(क) विद्याम् (ख) विद्यया (ग) विद्यायाः (घ) विद्यायै

(iii) अवकरक्षेपनेन ....................... जलं प्रदूषितं जातम् |

क) नद्या ख) नदीनाम् ग) नदीभ्यः घ) नदीभिः

(iv) माता................... भोजनं यच्छति |

क) साधवे ख) साधुम् ग) साधुना घ) साधूनाम्

(v) एतत् .................. पुस्तकम् अस्ति |

क) मम ख) मया ग) त्वया घ) मत्

**प्र.8 प्रदत्तविकल्पेभ्यः उचितं धातुरूपं चित्वा वाक्यानि पूरयत – (केवलं प्रश्नचतुष्टयम्)** **1x4=4**

(i) अशोकः सदा प्रातः षड्वादनकाले सूर्यं .........................। (नम्–लट्लकारे)

(क) अनमत् (ख) नमन्ति (ग) नमसि (घ) नमति

(ii) कमला अद्य पितुः पत्रम् ................................ । (लभ्–लृट्लकारे)

(क) लभते (ख) लप्स्यते (ग) लभन्ते (घ) लप्स्यसे

(iii) कीर्तिः ह्यः भ्रात्रा सह चेन्नईनगरम्...............................। (गम्– लङ्लकारे)

(क) अगच्छत् (ख) आगच्छति (ग) गमिष्यति (घ) गच्छन्तु

(iv) वयं फलानि गृहम् ...................... ।

(क) नयावः ख) नयामः ग) नयन्ति घ) नयथ

(v) श्वः मम मित्रस्य जन्मोत्सवः........................ ।

(क) भविष्यथ ख) भविष्यामि ग) भविष्यामः घ) भविष्यति

**प्र.9 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रकृति–प्रत्ययविभागं संयोजनं वा विकल्पेभ्यः चिनुत–**
**(केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) ब्राह्मणोऽपि श्राद्धं **<u>ग्रह् + क्त्वा</u>** गृहम् उपावृतः।

(क) गत्वा (ख) ग्रहत्वा (ग) गृत्वा (घ) गृहीत्वा

(ii) वृक्षम् **<u>आ + रुह् + ल्यप्</u>** दृश्यतां कः एषः शब्दापयति ?

(क) आरूढः (ख) आरुह्य (ग) आदाय (घ) आरूध्वा

(iii) सः प्राणैरेव स्वदेशं स्वदेशं स्वतन्त्रं **<u>कर्तुम्</u>** इच्छति ।

(क) कृ + तुमुन् (ख) क्रि + तुमुन् (ग) कर् + क्त्वा (घ) कृ + ल्यप्

(iv) सैनिकान् भिल्लान् च आत्मघातं **<u>कुर्वतः</u>** दृष्ट्वा ।

(क) कृ + तुमुन् (ख) कृ + शतृ (ग) कृ + क्त्वा (घ) कृ + ल्यप्

(v) दैवम् आलस्यं च **<u>विहाय</u>** पुरुषार्थः विधेयः।

(क) वि + हा + तुमुन् (ख) वि + हा + शतृ (ग) विहा + क्त्वा (घ) वि + हा + ल्यप्

**प्र.10 मञ्जूषातः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत– (केवलं प्रश्नचतुष्टयम्) 1x4=4**

(i) तव समीपे.................................. पुस्तकानि सन्ति?

(ii) महात्मागान्धिः ........................... सत्यम् अवदत् ।

(iii) वीराणां ......................... प्रशंसा भवति ।

(iv) यदि त्वं प्रयत्नं करिष्यसि ..............................सफलताम् प्राप्स्यति ।

(v) किन्तु बालकस्य ............................. रक्षकः नास्ति ।

| **मञ्जूषा –** | सर्वदा, सर्वत्र, अत्र, कति, तर्हि |
|---|---|

## <u>खण्डः 'घ' (पठित–अवबोधनम्)</u>

**प्र.11 अधोलिखितं गद्यांशम् पठित्वा तदाधारितान् प्रश्नान् उत्तरत– (5)**

अत्र तु दैवं कारणमिति न उचितम्, अतः सर्वथा दैवम् आलस्यं च विहाय पुरुषार्थः विधेयः। एतत्चिन्तयित्वा राजा पण्डितसभां कारितवान्। राजा अवदत्– 'भोः भोः पण्डिताः। श्रूयतां मम वचनम् – अस्ति कश्चिद् एवम्भूतो विद्वान् यो मम पुत्राणां नित्यम् उन्मार्गगामिनाम् अनधिगतशास्त्राणाम् इदानीं नीतिशास्त्रोपदेशेन पुनर्जन्म कारयितुं समर्थः?'

**I. एकपदेन उत्तरत– (केवलं प्रश्नद्वयम्) (½x2=1)**

(i) राजा कान् उवाच ?

(ii) किं कारणं न उचितम् ?

(iii) पुनर्जन्म कारयितुं कः समर्थः?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नैकम्) (2x1=2)**

(i) कथं पुरुषार्थः कर्तव्यः ?

(ii) नृपस्य पुत्राः कीदृशाः आसन् ?

**III. भाषिककार्यम् – (केवलं प्रश्नद्वयम्)** **(1x2=2)**

(i) अनुच्छेदे 'भाग्यम्' इत्यस्य पदस्य कः पर्यायः प्रदत्तः?

(क) दैवम् (ख) आलस्यम् (ग) नित्यम् (घ) वचनम्

(ii) 'यो मम पुत्राणाम्' अत्र 'मम' पदं कस्मै प्रयुक्तम् ?

(क) पण्डितेभ्यः (ख) पण्डिताय (ग) नृपाय (घ) पुत्राय

(iii) 'मूर्खः' इत्यस्य कः विपर्ययः अनुच्छेदे प्रयुक्तः?

(क) राजा (ख) तपस्वी (ग) विद्वान् (घ) पुनर्जन्म

**प्र.12 अधोलिखितम् पद्यांशम् पठित्वा तदाधारितान् प्रश्नानान् उत्तरत–** **(5)**

वयमिह परितुष्टाः वल्कलैस्त्वं दुकूलैः,
सम इह परितोषो निर्विशेषो विशेषः।
स तु भवति दरिद्रो यस्य तृष्णा विशाला,
मनसि च परितुष्टे कोऽर्थवान् को दरिद्रः॥

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **(½x2=1)**

(i) कस्मिन् परितुष्टे सर्वे समानाः भवन्ति ?

(ii) अस्मिन् संसारे निर्विशेषः विशेषः च परितोषः कीदृशः ?

(iii) त्वं कैः परितुष्टः असि ?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नैकम्)** **(2x1=2)**

(i) अस्मिन् संसारे कः दरिद्रो भवति?

(ii) वयं कैः परितुष्टाः स्मः?

**III. भाषिककार्यम् – (केवलं प्रश्नद्वयम्)** **(1x2=2)**

(i) श्लोके 'वल्कलैः' इत्यस्य पदस्य कः विपर्ययः प्रयुक्तः?

(क) दुकूलैः (ख) दुकुले (ग) त्वम् (घ) वयमिह

(ii) अत्र 'भवति' इति क्रियायाः कर्तृपदं किम् ?

(क) दरिद्रः (ख) अर्थवान् (ग) यस्य (घ) तृष्णा

(iii) 'धनी' पदस्य कः पर्यायः अस्मिन् श्लोके प्रयुक्तः?

(क) दरिद्रः (ख) अर्थवान् (ग) मनसि (घ) तृष्णा

**प्र.13 अधोलिखितम् नाट्यांशं पठित्वा तदाधारितान् प्रश्नान् उत्तरत–** **(5)**

**प्रतापः** – धिङ् माम् अधन्यम्, योऽहं मातृभूमिं रक्षितुम् असमर्थः। अलं मम एतेन जीवितेन। (दीर्घं निःश्वसिति )

(यावत् सहचराः तस्य आकृतिं दृष्ट्वा व्याकुलाः भवन्ति, तावदेव सहसा प्रविशति कश्चिद् मेवाडराजपुत्रः)

**राजपुत्रः** – (राजोचितं प्रणम्य) विजयतां महाराज !, विजयताम्।

**प्रतापः** – (समाश्वस्य) अयि भ्रातः! कथं जयघोषं कृत्वा मां लज्जयसे?

**राजपुत्रः** – देव ! कथं भवान् वदति एवम् ? किं न खलु कृतं भवता राज्यत्राणाय? स्वदेशं स्वाधीनं कर्तुं भवता किं न सोढम् ? विजेष्यते ननु भवान् !

**प्रतापः** – कुतस्तावद् विजयः। स्वदेशमेव त्यक्तुं तत्परोऽहम्।

**I. एकपदेन उत्तरत – (केवलं प्रश्नद्वयम्)** **(½x2=1)**

(i) प्रतापः काम् रक्षितुम् असमर्थः?

(ii) राजपुत्रः कस्य विजयम् इच्छति ?

(iii) स्वदेशं स्वाधीन कर्तुं केन कष्टं सोढम् ?

**II. पूर्णवाक्येन उत्तरत– (केवलं प्रश्नैकम्)** **(2x1=2)**

(i) सहसा कः प्रविशति ?

(ii) कः स्वदेशं त्यक्तुं तत्परः ?

**III. भाषिककार्यम् – (केवलं प्रश्नद्वयम्)** **(1x2=2)**

(i) नाट्यांशे 'माम्' पदं कस्मै प्रयुक्तम्।

(क) प्रतापाय (ख) राजपुत्राय (ग) भटाय (घ) सहचराय

(ii) नाट्यांशे 'अलम्' पदस्य योगे का विभक्तिः प्रयुक्ता?

(क) प्रथमा (ख) द्वितीया (ग) तृतीया (घ) चतुर्थीः

(iii) संवादे 'वदति' इति क्रियापदस्य कर्तृपदं किम्?

(क) कथम् (ख) एवम् (ग) भवान् (घ) किमपि न

**प्र.14 अधोलिखितवाक्येषु रेखाङ्कितपदानि आधृत्य प्रश्ननिर्माणं कुरुत – (केवलं प्रश्नचतुष्टयम्) (1x4=4)**

(i) सम्पदः **विमृश्यकारिणं** वृणते ।

(ii) **ऐश्वर्यस्य** विभूषणं सुजनता ।

(iii) एकः चन्द्रः **तमः** हन्ति।

(iv) **सैनिकेन** स्वदेशदुर्दशां द्रष्टुं न शक्यते।

(v) **विद्याहीनाः** पुत्राः न शोभन्ते।

**प्र.15 अधोलिखितस्य श्लोकस्य अन्वयम् उचितपदैः पूरयत– (1x4=4)**

सद्भिस्तु लीलया प्रोक्तं शिलालिखितमक्षरम् ।
असद्भिः शपथेनापि जले लिखितमक्षरम् ॥

**अन्वयः-** सद्भिः तु (i)......................प्रोक्तम् (अपि) शिला (ii) .................. अक्षरम् (इव भवति)। असद्भिः (iii) . . . . . . . . . . . . . . . . . . . . . .प्रोक्तम् अपि (iv)..........................लिखितम् अक्षरम् (इव भवति)।

| मञ्जूषा – | शपथेन, जले, लिखितम्, लीलया |
|---|---|

**प्र.16 अधोलिखितकथायाः पूर्तिः मञ्जूषायाः उचितैः पदैः कुरुत– (½x8=4)**

एतत् चिन्तयित्वा (i) . . . . . . . . . . . . . . . . राजा पण्डितसभां कारितवान् । सः विदुषः अवदत् –"भो ! पण्डिताः ! किं कोऽपि (ii) . . . . . . . . . . . . . . . . मम पुत्राणां नीतिशास्त्रोपदेशेन (iii) . . . . . . . . . . . . . . . . कारयिष्यति? अहं तस्मै अर्धराज्यं दास्यामि । ततः (iv) . . . . . . . . . . . . . . . . नाम महापण्डितः बृहस्पतिरिव अवदत् "महाराज। महाकुले (v) . . . . . . . . . . . . . . . . इमे राजपुत्राः मया षट् (vi) . . . . . . . . . . . . . . . . नीतिं ग्राहयितुं शक्यन्ते।" राजा (vii) . . . . . . . . . . . . . . . . भूत्वा तस्य हस्ते स्व (viii) . . . . . . . . . . . . . . . . अयच्छत् ।

| मञ्जूषा – | प्रसन्नः, पुत्रान्, सुदर्शनः, पुनर्जन्म, विद्वान्, विष्णुशर्मा, मासाभ्यन्तरे, सम्भूताः |
|---|---|

**प्र.17 अधोलिखितवाक्येषु रेखाङ्कितपदानां प्रसङ्गानुसारम् उचितम् अर्थं विकल्पेभ्यः चिनुत–**
**(केवलं प्रश्नत्रयम्) 1x3=3**

(i) विप्रः **कोपात्** नकुलं व्यापादितवान् ।

(क) प्रेम्णः (ख) मोहात् (ग) क्रोधात् (घ) प्रसादात्

(ii) **भूमि**स्तोयं खन्यमाना ददाति ।

(क) महीपतिः (ख) वसुन्धरा (ग) जलम् (घ) गृहात्

(iii) अस्ति **भागीरथी** तीरे पाटलीपुत्रनामधेयं नगरम् ।

(क) यमुना (ख) सरस्वती (ग) नर्मदा (घ) गङ्गा

(iv) त्वदीया **जननी** धन्या ।

(क) जानकी (ख) मातृभूमिः (ग) जन्मदात्री (घ) जननि